स्नस्य गर्भदेशावधिर्यावान् कर्णस्तावता मानेन तद्भुजास्तु तस्य कर्णस्य भुजास्तु लाञ्छयेत्। अत्र बाह्यचतुरस्रसूत्राण्येव कर्णोभयपार्श्ववर्त्तीनि निजभुजाकारतया भुजाशब्देनोच्यन्ते। अयमाशयः—बाह्यचतुरस्रसम्बन्धिन्येकस्मिन् कोणे कर्णार्द्धपरिमितस्य सूत्रस्यादिं विधाय तत्सूत्रं चतुरस्ररेखोपरि प्रसार्य्य सूत्रप्रान्ते लाञ्छयेत्। एवं प्रतिकोणं सूत्रादिं निधाय प्रातिलोम्यानुलोम्येन सूत्रप्रसारणात् तत्तत्प्रान्ते लाञ्छयन् प्रतिदिशं लाञ्छनद्वयकरणाद्दिक्चतुष्टयेन लाञ्छनेषु सूत्राष्टकनिपातनादष्टास्रकुण्डं कुर्य्यादिति। अयमिह निर्म्माणप्रकारः—पूर्ववच्चतुरस्रीकृतस्य क्षेत्रस्य बहिश्चतुर्द्दिक्षु द्वादशमं भागं विन्यस्य तत्परिमाणेन अपरं चतुरस्रं कुर्य्यात्। अथ तदीयकर्णार्द्धपरिमितस्य सूत्रस्य प्रतिकोणमादिं विधाय चतुरस्ररेखोपरि प्रसारणात् तत्तत्प्रान्तेषु लाञ्छयन् दिक्चतुष्टयेन लाञ्छनाष्टकं कृत्वा तल्लाञ्छनोपरि सूत्राष्टकनिपातनादैशानदिशि पूर्व्वाभिमुखयोनिकमष्टास्रकुण्डं कुर्य्यात्। इदानीं दिग्नियममन्तरेणैव तत्तत्कर्म्मोपयोगितया विज्ञानललितोपदिष्टं कुण्डमुच्यते। “सप्तमांशं बहिर्न्यस्य कृत्वा वृत्तमिह भ्रमात्। चतुर्थभागान्न्यूनेन पूर्व्वक्षेत्रेण सम्मितैः। धनुर्ज्याकृतिभिः पञ्चसूत्रैः पञ्चास्रकुण्डकम्। होमे प्रशस्यते भूतशाकिनीग्रहनिग्रहे”। चतुरस्रस्य क्षेत्रस्य बहिःप्रदेशे चतुर्द्दिक्षु क्षेत्रसप्तमांशं विन्यसेत्। ततः क्षेत्रगर्भविन्यस्तादेः बाह्यस्थितसप्तमांशोपरि विन्यस्तप्रान्तस्य सूत्रस्य सर्व्वतः परिभ्रामणात् वृत्तं निष्पादयेत्। पूर्व्वक्षेत्रेणेति, बहिःस्थितवृत्तापेक्षया, पूर्व्वक्षेत्रशब्देन आन्तरश्चतुरस्रक्षेत्रमेवोच्यते। ततश्चायमर्थः आन्तरचतुरस्रस्य यद्दैर्घ्यं ततः स्वकीयचतुर्थभागान्न्यूनं कृत्वा यन्मानं भवति तावता मानेन परिमितं सूत्रं निधाय तादृशानि पञ्च सूत्राणि बाह्यवृत्तस्यान्तर्विन्यस्य सूत्रसन्धौ कोणं कुर्य्यात्। तानि च पञ्च सूत्राणि प्रत्येकं प्रान्तद्वयसंस्पृष्टवृत्तत्वात् धनुर्ज्याकृतीनि धनुरारूढमौर्व्वीसदृशानि स्युः। ततः पञ्चसूत्रातिरिक्तं सर्व्वं परित्यज्य पञ्चास्रकुण्डं रचयेत्। तच्च ग्रहनिग्रहादिहोमे प्रयोज्यम्। “दशमांशं बहिर्न्यस्य कृत्वा वृत्तमिह भ्रमात्। भक्त्वा क्षेत्रं चतुःषष्ट्या तद्भागैः त्रिंशता त्रिभिः। समानसूत्रं तादृक्षात् सप्तास्रं सूत्रसप्तकात्। अभिचारोपशान्त्यर्थं होमकुण्डमिति स्मृतम्”। इहापि चतुरस्रस्य क्षेत्रस्य दशमभागं चतुर्द्दिक्षु वहिर्विन्यस्य पूर्व्ववत् वृत्तं कुर्य्यात्। अथ पूर्व्वक्षेत्रं चतुःषष्ट्या विभज्य तेषां चतुःषष्टिसंख्यानां भागानां मध्ये त्रयस्त्रिंशत्संख्यैर्भागैः परिमितं सूत्रं कृत्वा तादृशानि सप्त सूत्राणि वृत्तस्यान्ते विन्यस्य सप्तास्रं कुण्डं कुर्य्यात्। अत्रापि सूत्राणां धनुर्ज्याकारत्वं सूत्रसन्धौ कोणनिर्म्माणं सप्तसूत्रातिरिक्तपरिमार्ज्जनं चेति पूर्व्ववदेव वेदितव्यम्। एतच्च कुण्डमभिचारदोषोपशमनहोमेषु प्रयोज्यम्। आह विश्वकर्म्मा “यावन्मात्रः कुण्डविस्तार उक्तस्तावत् खातस्यापि मानं प्रदिष्टम्। यादृक् कुण्डस्याकृतिः संप्रदिष्टा तादृग्रूपं मेखलाया विदध्यात्। स्थापने सर्व्वकुण्डानां ध्वजायः सर्व्वसिद्धिदः”। सर्व्वेषु चैतेषु प्रोक्तमानाद्द्व्यङ्गुलयवादि न्यूनमतिरिक्तं वा विधाय ध्वजायः साधनीयः। विस्तारे दैर्घ्यगुणिते अष्टभिर्विभक्ते यद्येकः परिशिष्यते तदा ध्वजाय इति। “खातेऽधिके भवेद्रोगो हीने धेनुधनक्षयः। वक्रकुण्डे तु सन्तापो मरणं भिन्नमेखले। मेखलारहिते शोकोऽभ्यधिके वित्तसंक्षयः। भार्य्याविनाशनं प्रोक्तं कुण्डे योन्या विना कृते। अपत्यध्वंसनं प्रोक्तं कुण्डं यत् कण्ठवर्ज्जितम्”। खातहीने भवेद्रोगः इत्यादिना खातादिलक्षणरहितस्य कुण्डस्यानिष्टफलत्वदर्शनादिदानीं खातादीनामेव लक्षणमभिधीयते। तद्यथा मोहचूडोत्तरशास्त्रे “चतुर्व्विंशतिमं भागमङ्गुलं परिकल्प्य तु। चतुर्व्विंशाङ्गुलं हस्तं कुण्डानां परिकल्पयेत्। हस्तमात्रं खनेत्तिर्य्यगूर्द्ध्वं मेखलया सह”। मुष्टिमानं शतार्द्धे त्वित्यादिना प्रसिद्धेनैव हस्ताङ्गुलव्यवहारेण होमानुसारात् कुण्डमानमुक्तम्। इयन्तु खातादिमानकथनार्थं परिभाषा क्रियते। चिकीर्षितकुण्डक्षेत्रं चतुर्व्विंशतिधा विभज्य यावान् चतुर्व्विंशतितमो भागस्तावत्परिमाणमङ्गुलं परिकल्प्य चतुर्व्विंशत्या अङ्गुलैर्हस्तं परिकल्पयेत्। ततस्तेन हस्तेन परिमितं सर्व्वकुण्डानां तिर्य्यक्खातमानं विधाय मेखलासहितस्य खातस्य तेनैव हस्तेन परिमितमूर्द्ध्वमानं विदध्यात्। प्रथमे उक्तम् “कुण्डं जिनाङ्गुलम्। तिर्य्यगूर्द्ध्वं मेखलया सह” जिनाङ्गुलं चतुर्व्विंशत्यङ्गुलम्। प्रतिष्ठासारसंग्रहेऽपि “पञ्च—त्रिमेखलोच्छ्रायां ज्ञात्वा शेषमधः खनेत्”। विश्वकर्म्मणाप्युक्तम् “व्यासात् खातः करः प्रोक्तो निम्नस्त्र्यङ्गुलेन तु”। त्र्यङ्गुलानि—पञ्चदशाङ्गुलानि खातस्य निम्नत्वम्। “उन्नता सा नवाङ्गुलैरिति, वक्ष्यमाणत्वान्मेखलात्रयपक्षे नवाङ्गुलं प्रथममेखलयोत्सेध इत्युभयोस्त्रयोर्विं-